# संस्कृत वार्ता:

दिनाङ्क : 01/07/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- डिजिटल इण्डिया अभियानस्य एकादश-वर्षाणां पूर्त्तौ प्रधानमन्त्रिणा प्रोक्तं यत्, अनेनाभियानेन निर्धनाः शोषिताश्च जनाः सबलीकृताः, सहैव लक्षाधिकानां नागरिकाणां जीवनं परिवर्तितम् ।
- विकसित भारत जी राम जी- अधिनियमस्य-पञ्चविंशत्यधिकद्विसहस्रतमस्य अन्तर्गतं वर्धितानि पारिश्रमिक-मूल्यानि अद्यारभ्य समग्र-देशे कार्यान्वितानि ।
- नव-नियुक्तः सेनाध्यक्षः जनरल् धीरज् सेठ् इत्येषः, वर्धमान-सुरक्षा-वातावरणस्य समाह्वानानां निवारणाय सेनायाः आधुनिकीकरणस्य आवश्यकतायाः विषये अवधानं दत्तवान्।
- शिवराज-सिंह-चौहानः, किरेन-रिजिजू इत्येतौ अरुणाचलप्रदेशे जलाप्लावेन प्रभावित-क्षेत्राणाम् निरीक्षणं कृतवन्तौ।
- भारतीय-ऋतु-विभागः अवदत् यत् आगामि-दिनेषु दिल्ली, हरियाणा, चण्डीगढ, पञ्जाब् इत्येतेषु प्रदेशेषु दक्षिण-पश्चिम प्रावृट्कालः अग्रे गमिष्यति।
- अपि च, फ़ीफ़ा-विश्वकप्-क्रीडायां मेक्सिको-देशः अद्य प्रातः मेक्सिको-सिटी-क्रीडाङ्गणे राउण्ड्-आफ़्-32-क्रीडायां इक्वाडोर -देशम् द्वे-शून्येन पराजित्य राउण्ड्-आफ़्-16 इत्यस्मिन् प्रविष्टवान्।

---

<u>प्रधानमन्त्री-डिजिटल इण्डिया</u>

प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत्, डिजिटल- इण्डिया-अभियानेन शासनस्य परिभाषा परिमार्जिता, नागरिकाणां सशक्तिकरणं विहितम् , सहैव देशस्य समग्र-विकासाय गतिः प्रदत्ता ।

अस्य अभियानस्य एकादश-वर्षाणां पूर्त्तौ प्रधानमन्त्रिणा प्रोक्तं यत्, अनेनाभियानेन निर्धनाः शोषिताश्च जनाः सबलीकृताः, सहैव लक्षाधिकानां नागरिकाणां जीवनं परिवर्तितम् । सर्वकारस्य एषः डिजिटल-इण्डिया-कार्यक्रमः पञ्चदशाधिकद्विसहस्रतमवर्षस्य अस्मिन्नेव दिने समारब्धः। ततः आरभ्य अनेन देशे नागरिकाणां परस्पर-सम्पर्कस्य, शिक्षणस्य, डिजिटल-शोधनस्य तथा च सर्वकारीय-सेवापद्धतौ कश्चन अभूतपूर्वः परिष्कारो विहितः। वर्तमान-समये भारतेन समग्र-विश्वे विशालतमः डिजिटल-पब्लिक-इन्फ्रास्ट्रक्चर-तन्त्रः सुदृढतया निर्मितः ।

-----------------------------------------------

## राष्ट्रपति-2047-दृष्टिकोणः

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः अद्य यूनः प्रार्थितवती यत्ते सप्तचत्त्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् विकसित-भारतस्य सङ्कल्पं पूरयितुं पूर्ण-समर्पणेन, सत्यनिष्ठया, दृढ-नैतिक-मूल्यैश्च सह अग्रे वर्धयेयुः । अनन्तपुरे आन्ध्रप्रदेश-केन्द्रीय-विश्वविद्यालयस्य' प्रथमे दीक्षान्त-समारोहे मुख्यातिथिरूपेण सम्बोधयन्ती राष्ट्रपतिः अवदत् यत्, युवकाणाम् ऊर्जा, प्रतिभा, कर्तव्यनिष्ठा च कस्यचिदपि समावेशिनः समृद्धस्य च राष्ट्रस्य निर्माणे निर्णायिक-भूमिकां निर्वहिष्यति।

राष्ट्रपतिना विशेषेण रेखाङ्कितं यत्, अस्मिन् दीक्षान्त-समारोहे पदक-प्राप्तये छात्राभिः छात्राणामपेक्षया अधिकः प्रयत्नः विहितः । अनेन देशे युव-महिलानां वर्धमानाः आकाङ्क्षाः दृढसङ्कल्पश्च दृश्यते । सा स्नातकेभ्यः जीवनपर्यन्तं ज्ञानार्जनाय तथा च स्वकीय-ज्ञानस्य उपयोगं समाजाय, विशेषतः निर्धनानां शोषितानां च वर्गाणां कल्याणाय विधातुम् आग्रहं कृतवती।

-----------------------------------------------

## जी राम जी-पारिश्रमिकः

विकसित भारत जी राम जी- अधिनियमस्य-पञ्चविंशत्यधिकद्विसहस्रतमस्य अन्तर्गतं वर्धितानि पारिश्रमिक-मूल्यानि अद्यारभ्य समग्र-देशे कार्यान्वितानि । ग्रामीण-विकास-मन्त्रालयेन प्रसारितायाः अधिसूचनायाः अनुसारं, सर्वेषु राज्येषु केन्द्रशासित-प्रदेशेषु च पारिश्रमिक-

अनुपातेषु श्लाघनीया वृद्धिः कृता । मन्त्रालयेन प्रोक्तं यत्, प्रथमवारं प्रतिदिनं त्रिशत-रूप्यकाणां कश्चन 'अन्तरिम-आधार-पारिश्रमिकानुपातः निर्धारितः । अनेन सुनिश्चेष्यते यत् देशस्य कस्मिन्नपि भागे अधिसूचितः न्यूनतम-पारश्रमिकः अस्मात् स्तरात् अल्पं न भवेत्।

-----------------------------------------------

## अरुणाचल-जलाप्लावः

केन्द्रीय-मन्त्रिणौ शिवराज-सिंह-चौहानः, किरेन-रिजिजू इत्येतौ अरुणाचलप्रदेशस्य मुख्यमन्त्रिणा पेमा-खाण्डू इत्यमुना सह अद्य द्वितीयदिनेऽपि राज्यस्य जलाप्लावेन प्रभावित-क्षेत्राणाम् आकाश-मार्गेण निरीक्षणं कृतवन्तौ। एतेन उच्चस्तरीयेन दलेन सर्वप्रथमं अत्यधिक-प्रभावितस्य पूर्व-सियांग-जनपदस्य पासीघाट-क्षेत्रस्य ततः परं च बोयिंग-ग्रामस्य च आपत्स्थितेः प्रत्यक्षं समीक्षणं विहितम्। अत्रावसरे केन्द्रीय-मन्त्री श्रीचौहानः जलाप्लावेन पीडित-नागरिकान् आश्वस्य प्रोक्तवान् यत्, केन्द्र-सर्वकारः राज्य-प्रशासनेन सह पूर्ण-समन्वयं कृत्वा प्रभावितेभ्यः जनेभ्यः व्यापकं वित्तीयं संरचनात्मकं च साहाय्यं प्रदास्यति। राज्ये एतावता चत्वारः जनाः मृत्युमुपगताः एकविंशति-जनाः व्रणिताः अभवन्। राज्यस्य अष्टाविंशति-जनपदेषु नव-नवत्यधिक-चतुश्शतोत्तर-नवतिसहस्राधिकाः जनाः अस्मात् प्रकोपात् प्रभाविताः सन्ति । अरुणाचलप्रदेशे समीक्षां विधाय केन्द्रीय-मन्त्रिणौ चौहान-रिजिजू इत्येतौ असम-राज्यस्यापि जलाप्लावेन ग्रस्त-क्षेत्राणां निरीक्षणाय प्रस्थितवन्तौ।

-----------------------------------------------

## नव-नियुक्तः सेनाध्यक्षः

नव-नियुक्तः सेनाध्यक्षः जनरल् धीरज् सेठ् इत्येषः, वर्धमान-सुरक्षा-वातावरणस्य समाह्वानानां निवारणाय सेनायाः आधुनिकीकरणस्य आवश्यकतायाः विषये अवधानं दत्तवान्। एकत्रिंशत्तम-सेनाध्यक्षत्वेन कार्यभारं स्वीकृत्य अद्य प्रसारमाध्यमान् सम्बोधयन्, जनरल् सेठः अधोरेखितवान् यत् भारतीयसेनायाः उद्देश्यं प्रविविधियुतस्य भविष्यस्य कृते सज्जीभूतस्य सेनायाः निर्माणम् अस्ति सहैव यश्च प्रत्येकस्मिन् विषये सशक्तं, बहुविधक्षेत्रेषु कार्यं कर्तुं च समर्थम् भवेत्।

-----------------------------------------------

## अश्विनी वैष्णव

दिल्ल्यां वसंत कुञ्ज-क्षेत्रस्य नेल्सन मण्डेला-मार्गेण सह द्वारका-द्रुतमार्गं संयोजयन् दिल्ली-नगरे अष्ट चत्वारिंशदधिकैकशत ए. ई. राष्ट्रियराजमार्गस्य कृते षट्मार्गीय-सुरङ्गस्य निर्माणाय अद्य सर्वकारेण अनुमतिः प्रदत्ता। अद्य राष्ट्रिय-राजधान्यां वार्ताहरान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, उत्तरप्रदेशे राष्ट्रिय-राजमार्गस्य चतुस्त्रिंशत् इत्यस्य सप्तदशांशोत्तर सप्तदशाधिकैकशत कि. मी. सुदीर्घस्य कानपुर-कबराई-खण्डस्य चतुर्मार्गीय-अभिगम-नियन्त्रित-मार्गस्य निर्माणम् अपि सर्वकारेण अनुमोदितम् अस्ति, यत्र संरचनाः षड्मार्गाणि यावत् सुलभतया विस्तारयितुं परिकल्पिताः सन्ति।

-----------------------------------------------

## जापान-पीएम

जापान-देशस्य प्रधानमन्त्री साने ताकाइची अद्य सायं त्रिविसीय-भारत-यात्राप्रसङ्गे नवदेहलीं प्राप्स्यति। इयं तस्याः प्रथमा आधिकारिकी भारत-यात्रा वर्तते। सा श्वः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह षोडशे भारत-जापान वार्षिक-शिखरसम्मेलने भागं ग्रहीष्यति।

इदं शिखरसम्मेलनम् उभयदेशयोः कृते द्विपक्षीय-सहयोगस्य समग्र-क्षेत्रस्य समीक्षां सुदृढीकरणं च विधातुम्, सहैव पारस्परिक-हितस्य क्षेत्रीय-वैश्विक-विषयेषु विचाराणां विनिमयीकरणं कर्तुम् एकं प्रकृष्टं अवसरं प्रदास्यति।

-----------------------------------------------

## भारतीय-ऋतु-विभागः

भारतीय-ऋतु-विभागः अवदत् यत् आगामि-दिनेषु दिल्ली, हरियाणा, चण्डीगढ, पञ्जाब् इत्येतेषु प्रदेशेषु दक्षिण-पश्चिम प्रावृट्कालः अग्रे गमिष्यति। आगामि-दिनद्वयोः उत्तरप्रदेशे, बिहारे, उत्तराखण्डे, ओडिशा-प्रदेशे, विदर्भ-प्रदेशे च प्रचण्डतः अतिवृष्टेः ऋतुविभागेन नारङ्गवर्णीया पूर्वसञ्चेतना प्रसारिता अस्ति। अद्य छत्तीसगढस्य, तटीय-कर्नाटकस्य, पूर्वी-मध्यप्रदेशस्य, केरलम्

राज्यस्य, माहे-प्रदेशस्य, कोङ्कण-गोवाराज्ययोः, दक्षिणान्तरिक-कर्नाटकस्य च केषुचित् भागेषु अपि एतादृशी स्थितिः भवितुमर्हति । दिल्ली, हरियाणा, पञ्जाब, चण्डीगढ, हिमाचलप्रदेश, आन्ध्रप्रदेश, पूर्वीराजस्थान, गाङ्गेय-पश्चिमवङ्गप्रदेश, अण्डमान्-निकोबार्-द्वीपेषु च पृथक्-पृथक् स्थानेषु, श्वः यावत् मेघगर्जनेन सह विद्युद्द्योतनेन झंझावातस्य च पूर्वानुमानम् अपि विभागेन प्रकटितम् ।

-----------------------------------------------

फ़ीफ़ा-विश्वकप्-क्रीडायां

फ़ीफ़ा-विश्वकप्-क्रीडायां मेक्सिको-देशः अद्य प्रातः मेक्सिको-सिटी-क्रीडाङ्गणे राउण्ड्-आफ़्-32-क्रीडायां इक्काडोर -देशम् द्वे-शून्येन पराजित्य राउण्ड्-आफ़्-16 इत्यस्मिन् प्रविष्टवान्। नार्वे-देशः अपि टेक्सास्-नगरे आइवरीकोस्ट-देशं द्वे-एकम् इत्यङ्कैः पराजित्य 16 तमे चरणे प्रविष्टवान्।

।। इति वार्ता: ।।